अनुजीवी, [न्] त्रि, (अनुजीवति, अनु + जीव् + णिनि ।) दासः । तत्पर्य्यायः । सेवकः २ अर्थी ३ । इत्यमरः ॥ अनुचरः । इति हलायुधः ॥ ("अनुजीविना पराधिकारचर्चा न कर्त्तव्या" । इति हितोपदेशः ।)

अनुज्ञा, स्त्री, (अनु + ज्ञा + भावे अङ् ।) आज्ञा । अनुमतिः । यथा, "नाग्न्योर्न ब्राह्मणयोर्न गुरुशिष्ययोरन्तरा व्यपेयात् अनुज्ञया तु व्यपेयात्" । इति तिथ्यादितत्त्वं ॥

अनुतरं, क्ली, (अनुतीर्य्यते नदी उत्तीर्य्यते अनेन, अनु + तॄ + अप् ।) आतरः । तरपण्यं । इत्यमरटीकायां रायमुकुटः ॥ पाराणी कड़ी । इति भाषा ।

अनुतर्षः, पुं, (अनु + तृष + भावे घञ् ।) तृष्णा । अभिलाषः । मद्यपानपात्रं । इति मेदिनी ॥

अनुतर्षणं, क्ली, (अनु + तृष + करणे ल्युट् ।) चषकः । सुरापानपात्रं । इत्यमरः ॥

अनुतापः, पुं, ( अनु + तप् + भावे घञ् ।) पश्चात्तापः । इत्यमरः ॥ पस्तान इति भाषा ।
("चिरसम्मोहशयनादुत्थितस्य य आत्मनः ।
हाहाकारोऽनुतापः स्यात् स्वकर्म्मस्मृतिसम्भवः"॥
इति सद्भावे ।)
("ख्यापनेनानुतापेन तपसाध्ययनेन च ।
पापकृन्मुच्यते पापात् तथा दानेन चापदि" ॥
इति मनुः ।)

अनुत्तमः, त्रि, (नास्ति उत्तमः उत्कृष्टो यस्मात् सः ।) श्रेष्ठः । प्रधानः । इत्यमरः ॥
("श्रुतिस्मृत्युदितं धर्म्ममनुतिष्ठन् हि मानवः ।
इह कीर्त्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम्" ।
इति मनुः ।) नञ्समासे तु अधमः ॥

अनुत्तरं, त्रि, (नास्ति उत्तरं प्रधानं यस्मात्, न उत्तरं इति नञ्समासो वा ।) मुख्यं । इति हेमचन्द्रः ॥ श्रेष्ठं । प्रतिजल्पविवर्जितं । प्रत्युत्तरहीनं । इति मेदिनी ॥ स्थिरं । इति धरणी ॥ अधः । दक्षिणदिक् । इत्यमरटीकायां स्वामी ॥ प्रत्युत्तराभावे क्ली । यथा, "भवत्यवज्ञा च भवत्यनुत्तरात्" । इति नैषधं॥

अनुदग्रः, त्रि, (नास्ति उदग्रं उन्नतं यस्मात्, न उदग्रः इति वा ।) अनुच्चः । बहुव्रीहौ तु अत्युच्चः ॥

अनुदात्तः, पुं, ( उत् + आ + दा + क्त, न उदात्तः इति नञ्समासः ।) वेदगाने नीचस्वरः । यथा, "उदात्तश्चानुदात्तश्च स्वरितश्च त्रयः स्वराः" । इति शब्दरत्नावली ॥
("उच्चैरुदात्तः, नीचैरनुदात्तः,समाहारः स्वरितः" इति पाणिनिः ।)

अनुदारः, त्रि, ( न उदार इति नञ्समासः नास्ति उदारो यस्मात् इति वा ।) अतिशयदाता । अदाता । अतिमहान् । अमहान् । अनुगतदारः । यथा, "यस्मिन् प्रसीदसि पुनः स भवत्युदारोऽनुदारश्च" । इति मम्मटभट्टः ॥

अनुदिनं, क्ली, ( दिने दिने इति वीप्सायामव्ययीभावः ।) प्रतिदिनं । प्रत्यहं । यथा,—
"पारावत खलु शिलाकणमात्रभोगी
कामी भवेदनुदिनं वद कोऽत्र हेतुः" ।
इति श्रीचैतन्यदेवः ॥

अनुद्रुतं, क्ली, (अनु + द्रु + क्तः ।) तालविशेषः । स तु द्रुतार्द्धं मात्राचतुर्थभागो वा । यथा,—
"अर्द्धमात्रं द्रुतं ज्ञेयं द्रुतार्द्धञ्चाप्यनुद्रुतं" ।
इति शब्दरत्नावली ॥ अनुधाविते त्रि । यथा,—
"अनुद्रुतः संयति येन केवलं
बलस्य शत्रुः प्रशशंस शीघ्रतां" ।
इति माघः ॥

अनुधावनं, क्ली, (अनु + धाव् + भावे ल्युट् ।) पश्चाद्धावनं । अनुसन्धानं । यथा,—
"तस्मिन् कुरङ्गशावाक्षी मुञ्चस्वित्तं निवारय ।
न तन्मनस्त्वदधीनं वृथा तत्रानुधावनं" ॥
इत्युद्भटः ॥

अनुनयः, पुं, (अनु + नी + भावे अच् ।) विनयः ।
("कथं नु शक्योऽनुनयो महर्षे-
र्विश्राणनाच्चान्यपयस्विनीनाम्" ।
इति रघुवंशे ।) तत्पर्य्यायः । प्रणिपातः २ प्रणतिः ३ । इति हेमचन्द्रः ॥ ( सदाचारः । क्रोधोपनयः ।
"एवं रामवचः श्रुत्वा लक्ष्मणानुनयं तथा" ।
इति रामायणं ।)

अनुपदं, क्ली, (अनु पश्चात् पद्यते गच्छति, अनु + पद् + पचाद्यच् । ) अनुगः । पश्चाद्गामी । इत्यमरः ॥ (व्य, पदस्य पश्चात् इति अव्ययीभावे अन्वक् । अनन्तरं । अव्यवहितोत्तरकालं ।
"अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः ।
आशिषामनुपदं समस्पृशत्
दर्भपाटिततलेन पाणिना" ।
इति रघुवंशे ।)

अनुपदी, [न्] त्रि (अनुपदमन्वेष्टा अनुपद + इन् ।) अन्वेष्टा । अन्वेषणकर्त्ता । इति हलायुधः ॥

अनुपदीना, स्त्री, (अनुपद + अनुपदं बद्धा इत्यर्थे खः तस्य ईनः स्त्रियां टाप् ।) पदायतोपानत् । इत्यमरः ॥ बुट् इत्यादिभाषा ।

अनुपमः, त्रि, (नास्ति उपमा सादृश्यं यस्य सः । ) उपमाशून्यः । उत्तमः । इति मेदिनी ॥ (सर्व्वोत्कृष्टः । सादृश्यरहितः ।
"बलं प्रमाणं शक्तिश्च परैरनुपमं मम" ।
इति रामायणे ।)

अनुपमा, स्त्री, (नास्ति उपमा सादृश्यं यस्याः सा ।) कुमुदनामदिग्गजयोषा । इत्यमरः ॥ सुप्रतीकनामदिग्गजस्त्री । "भवेदनुपमा सुप्रतीकिन्यां स्त्री त्रिषूत्तमे" । इति मेदिनी ॥

अनुपातः, पुं, (अनु + पत् + भावे घञ्, अनुरूपः त्रैराशिकेन पातः । पाटिगणितोक्तेन त्रैराशिकेन युक्तः संख्यापातः ।) पश्चात्पतनं । पूर्व्वाङ्कपातानुसारेण अपराङ्कपातः । यथा,—
"पुरान्तरं चेदिदमुत्तरं स्यात्
तदक्षविश्लेषलवैस्तदा किं ।
चक्रांशकैरित्यनुपातयुक्त्या
युक्तं निरुक्तं परिधेः प्रमाणं" ॥
इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥

अनुपातकं, क्ली, (पातयति निरयं प्रेरयति, पत् + णिच् + ण्वुल् । पातकं ब्रह्महत्यादि तत्सदृशं प्रादिसमासः । वेदनिन्दादिजन्यपापविशेषः । तानि च विष्णुना दर्शितानि, यथा,—"यागस्थस्य क्षत्रियस्य वैश्यस्य च रजस्वलायाश्चान्तर्व्वत्न्याश्चात्रिगोत्रायाश्चाविज्ञातस्य गर्भस्य शरणागतस्य च घातनं ब्रह्महत्यासमानमिति" । ) महापातकसदृशपापविशेषः ।

तत् पञ्चत्रिंशत्प्रकारं, यथा,—

समुत्कर्षे मिथ्यावचनं १
तत् द्विविधं । आत्मगामि ।
असूयापूर्व्वकपरगामि च ।
राजगामि पैशुन्यं १
पितुर्मिथ्यादोषकथनं १

एतत्त्रयं ब्रह्महत्यासमं ॥ ३

वेदत्यागः । स तु अधीतवेदविस्मरणं । १
वेदनिन्दा १
कौटसाक्ष्यं १
तद्द्विविधं । ज्ञातस्याकथनं । मिथ्याकथनञ्च ।
सुहृद्बधः १
स तु ब्राह्मणव्यतिरिक्तमित्रबधः ।
ज्ञानपूर्व्वकाभ्यासेन गर्हितान्नस्य अर्थात् अन्त्यजान्नस्य भक्षणं १
ज्ञानपूर्व्वकाभ्यासेन गर्हिताद्यस्य अर्थात् कृत्ताकादेर्भक्षणं १

एतत् षड्विधं सुरापानसमं ॥ ६

निक्षेपहरणं १
नरहरणं १
अश्वहरणं १
रजतहरणं १
भूमिहरणं १
हीरकहरणं १
मणिहरणं १

एतानि सप्त स्वर्णस्तेयसमानि ॥ ७

सपीण्डस्त्रीगमनं १
कुमारीगमनं १
अन्त्यजागमनं १
सख्युः स्त्रीगमनं १
औरसेतरपुत्त्रस्त्रीगमनं १
पुत्त्रस्यासवर्णस्त्रीगमनं १

एतानि षट् विमातृगमनसमानि ॥ ६

मातृष्वसृगमनं १
पितृष्वसृगमनं १
श्वश्रूगमनं
मातुलानीगमनं
शिष्यस्त्रीगमनं